# सिद्धता

# ।। संस्कृतम् ।।

## दशमीकक्ष्या

ഒരുക്കം 2012-13

സംസ്കൃതം - പത്താംതരം

केरलसर्वकारसामान्यशिक्षाविभागः

# प्रास्ताविकम्

प्रियसुहृदः

सर्वशिक्षाविभागेन उच्चविद्यालयछात्राणां पठनस्तर - वर्धनाय बहुविधानि प्रवर्तनानि आयोजितानि। तेषामन्य- तमत्वेन दशमवर्गस्य छात्राणाम् उपयोगितायै केषाञ्चन पठन प्रवर्तनानाम् आदर्शरूपाण्यत्र प्रकाश्यन्ते। छात्राणां चिन्ता- शेषीणां प्रवर्धनं दृढीकरणञ्चोद्दिश्य पाठानां पुनरवलोकनाय च सज्जीकृतमिदं पुस्तकम्। अस्मिन् सञ्चये विविधानि प्रवर्तनानि, प्रश्नमातृकाश्च दत्तानि । छात्राणां बहूपकारकः भवेदतस्याभ्यासः। अत्र प्रदत्तानि प्रवर्तनानि अध्यापकैः कक्ष्यायां निश्चयेन कारयितव्यानि।

# एककम् १–उद्योगः कार्यसाधकः

## आमुखम्

"उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।। "इति सर्वविदितम् । कर्मणः महत्त्वप्रतिपादके अस्मिन्नेकके उद्यमप्रेरिका एका कथा प्रदत्ता ।

## पाठः – १ अभित्तौ चित्रकर्म

संस्कृतसाहित्ये कथासाहित्यस्य स्थानं महत्तरमेव। पञ्चतन्त्रं,हितोपदेशः,कथासरित्सागरः इत्यादयः कथाग्रन्थाः प्रसिद्धाः वर्तन्ते । कथाः विनोददायिकाः ,विज्ञान दायिकाः उपदेशात्मिकाश्च भवन्ति । सोमदेवेन विरचितः उपदेशात्मककथाग्रन्थः भवति कथासरित्सागरः। कथासरित्सागरस्य कथापीठलम्बकमिति भागात् स्वीकृता "मूषिकचरितम् " इति उद्यमप्रेरिका कथा एव "अभित्तौ चित्रकर्म " इति नाम्ना पाठपुस्तके समाकलिता । अत्र छात्राणां पठनतात्पर्यवर्धनाय,पाठभागस्य आशयानाम् अवगमनाय, मूल्यनिर्धारणाय च सहायकानि कानिचन प्रवर्तनानि प्रदीयन्ते।

**प्रवर्तनम् १** – खण्डिकां पठित्वा प्रश्नानाम् उत्तरलेखनम्

आनन्दो नाम कश्चन युवकः आसीत् । बाल्ये एव तस्य मातापितरौ दिवङ्गतौ । सः तस्य बाल्यकालं मातुलगृहे नीतवान् । मातुलानी सर्वदा आनन्दं भर्त्सयन्ती आसीत् । अतः सः किमपि कर्म कृत्वा स्वजीवितं नेतुम् ऐच्छत् । सः सागरस्य तीरात् शुक्तीनां चयनं कृत्वा तेषां गुम्फनेन मालां कर्तुम् आरभत । पश्चात् शुक्तिभिः बहुविधानि करकौशलवस्तूनि निर्माय, विदेशान् प्रत्यपि तान् संप्रेष्य प्रभूतं धनम् आर्जितवान् ; सः सन्तोषेण जीवितं नीतवान् च।

१ अस्याः खण्डिकायाः आशयः कः ?

२ मृतौ इत्यर्थकं पदं खण्डिकातः चित्वा लिखत ।

३ मातुलपत्नी इत्यर्थकं पदं चित्वा लिखत ।

४ अस्यां खण्डिकायां विद्यमानानां क्त्वान्त –ल्यबन्त –तुमुन्नन्ताव्ययानां पट्टिकां कुरुत।

५ आनन्दः कथं धनं सम्पादितवान् ?

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

वाक्यशुद्धिः

**प्रवर्तनम् २** – यथोचितं योजयत

| | | | |
|---|---|---|---|
| १ | कथासरित्सागरः | – | कार्यसिद्धिः |
| २ | ज्ञातयः | – | सार्थवाहकाः |
| ३ | वणिक् | – | बान्धवाः |
| ४ | लोभी | – | कथापीठलम्बकम् |
| ५ | उद्यमः | – | अत्याग्रही |
| ६ | मूषिकचरितम् | – | सोमदेवः |
| | | – | आर्यशूरः |

मूल्यनिर्णयसूचिकाः–

उचितं संयोजनम्

पदशुद्धिः

**प्रवर्तनम् ३** –उदाहरणं पठित्वा सन्धिच्छेदं कुरुत

उदाः वणिक् +अस्ति = वणिगस्ति

तर्हि, भिषगस्ति = ................+.............

उदाः धेनवश्शङ्किताः = धेनवः +शङ्किताः

मूषिकश्शेते = ............+...........

उदाः प्रथितोऽभूत् = प्रथितः +अभूत्

नर्तकोऽभवत् =............+..........

उदाः तच्छ्रावयित्वा = तत् + श्रावयित्वा

एतच्छ्रुत्वा =................+...........

उदाः कुर्वन्नस्ति = कुर्वन् + अस्ति

भर्त्सयन्नासीत् = .............+...........

उदाः अकरोच्च = अकरोत्+ च

तच्च = .............+............

उदाः नगराद्बहिः = नगरात् + बहिः

गृहाद्बहिः= ..............+...........

मूल्यनिर्णयसूचिका

अपग्रथनम्,निगमनम् च

सन्धिज्ञानम्

**प्रवर्तनम् ४** – उदाहरणानुसारं लिखत –

उदाः गुणः अस्याम् अस्ति इति – गुणवती

तर्हि, गर्भः अस्याम् अस्ति इति – ...............

उदाः शक्तिः अस्मिन् अस्ति इति – शक्तिमान्

बुद्धिः अस्मिन् अस्ति इति – ..................

उदाः कृषकपुत्रः – कृषकस्य पुत्रः

स्वपुत्रः – .......................

उदाः काष्ठान् वहन्ति इति – काष्ठवाहकाः

भारान् वहन्ति इति – ...............

उदाः महान् च असौ धनिकः च – महाधनिकः

महान् च असौ पण्डितः च – ...............

उदाः त्रयाणां पथां समाहारः –त्रिपथम्

चतुर्णाम् पथां समाहारः – ....................

उदाः शैत्येन पीडितः –शैत्यपीडितः

आतपेन क्लान्तः – ..................

मूल्यनिर्णयसूचिका

अपग्रथनम्,निगमनम् च

पदशुद्धिः

**प्रवर्तनम् ५** –सम्भाषणं पठित्वा रिक्तांशान् पूरयत–

सुधीरः – नमस्ते ,आगच्छन्तु सर्वे, उपविशन्तु।

सुशीलः – अस्माकं संस्थायाः ............... भवते दातुं निश्चितम्।

सुधीरः – कर्मयोगी पुरस्कारः वा ?

विवेकः – .............। उत्तमकर्मकरस्य कृते दीयमानः पुरस्कारः अयम् ।

सुधीरः – धन्यवादः। वस्तुतः मम अर्हता............. वा ?

विवेकः – अस्त्येव । प्रयत्नस्य...........भवन्तं दृष्ट्वा एव वयं ज्ञातवन्तः।

मूल्यनिर्णयसूचिका–

आशयावगमनम्

उचितपदयोजनम्

**प्रवर्तनम् ६** – भक्तः ईश्वरं वरं पृच्छति। अस्मिन् वाक्ये कर्मद्वयं विद्यते। वरम् इति मुख्यं कर्म,ईश्वरम् इति गौणं(अप्रधानं) कर्म च भवति। एवं चेत् , अधो दत्तेषु वाक्येषु प्रधानकर्म अप्रधानकर्म च विविच्य पट्टिकां करोतु।

- वामनः बलिं वसुधां याचते।
- अजपालः अजं क्षीरं दोग्धि।
- माता पुत्रं धर्मं ब्रवीति।
- गर्दभः भारं नगरं नयति।
- वैश्यपुत्रः विशाखिलं मृतं मूषिकम् अयाचत।

सूचना– द्वयोः कर्मणोः, कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मत्वं यस्य शब्दस्य भवति तत् मुख्यकर्म, अपादानत्वादिना अपि विवक्षयितुं योग्यं यत् ,तत् अप्रधानं कर्म च भवति। उदाः – वैश्यपुत्रः विशाखिलं मृतं मूषिकम् अयाचत इति वाक्ये मूषिकम् इति प्रधानं कर्म,विशाखिलम् इति अप्रधानं च कर्म भवति। मृतम् इति मूषिकशब्दस्य विशेषणं च भवति। विशाखिलशब्दः अपादानत्वेन विवक्षयितुमपि योगयम् भवति।

**प्रवर्तनम् ७** – अधोदत्तानि वाक्यानि वाचयित्वा सङ्घेषु वाक्यानां सविशेषतां प्रत्य–भिज्ञाय पुनर्लिखन्तु। कक्षायाम् अवतारयन्तु।

- ................. बहिः वृक्षाः वर्तन्ते।(गृहम्)
- ................ बहिः द्रोणी वर्तते। (कूपः)
- ................ बहिः जलं स्रवति। (नालिका)
- बालाः .................. बहिः अन्नं क्षिपति।( स्थालिका)
- .............. बहिः क्रीडाङ्कणम् अस्ति। (विद्यालयः)

## एककम् २ – कृषिः मानवजीवातुः

### आमुखम्

भारते मानवजीवने वैदिककालादारभ्य कृषेः पशुपालनस्य च प्राधान्यं कल्पितमासीत्। प्रकृतेः जीवजालानां च सुस्थित्यै वृक्षाः अत्यन्तम् उपकुर्वन्ति । अतः तेषां संरक्षणम् अवश्यं करणीयम्। प्राचीनसंस्कृतग्रन्थेषु वृक्ष– पश्वादीनाम् संरक्षणोपायाः प्रतिपादिताः ।

## पाठः २ – वृक्षरोपणविधयः

**प्रवर्तनम् १** – अधोदत्तां खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

छात्रान् सङ्घान् कृत्वा प्रदत्तस्याः खण्डिकायाः सम्यक् वाचनाय निर्दिशतु । तदनन्तरं श्यामफलके लिखितानां प्रश्नानाम् उत्तरलेखनाय निर्दिशति।

वृक्षाणां परिपालनविषये भारतीयप्राचीनग्रन्थेषु बहूनि कार्याणि प्रतिपादितानि।

तादृशरीत्या लिखितः ग्रन्थः एव बृहत्संहिता । ग्रन्थोऽयं वराहमिहिरेण लिखितः। अस्मिन् ग्रन्थे १०६ अध्यायाः सन्ति। वृक्षरोपणपालनविधिः नामकात् अध्यायात् स्वीकृतः भागः एव वृक्षरोपणविधयः इति पाठः।

१ वृक्षरोपणपालनविधिमधिकृत्य रचितः ग्रन्थः कः?

२ बृहत्संहितायाः रचयिता कः ?

३ अस्मिन् ग्रन्थे कति अध्यायाः सन्ति?

४ वृक्षरोपणविधयः इति पाठः बृहत्संहितायाः कस्मात् अध्यायात् स्वीकृतः?

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

वाक्यशुद्धिः

**प्रवर्तनम् २** – यथोचितं योजयत

| | | |
|---|---|---|
| जीवातुः | – | किसलयः |
| प्रवालः | – | जीवनौषधम् |
| क्षेत्रम् | – | सन्निवेशितः |
| संश्लेषितः | – | कृषिभूमिः |

**प्रवर्तनम् ३** – उचितपदैः संभाषणांशान् पूरयतु।

आर्या – पितामह! ................ जायमानाः वृक्षाः के ?

पितामहः – जम्बू .................... ................. इत्यादयः।

गायत्री – अनूपे जायमानाः वृक्षाः एते वा !

आर्या – वृक्षाणां रोगकारणानि कानि ?

पितामहः – ................ .............. ................. च वृक्षेषु रोगाः जायन्ते।

**प्रवर्तनम् ४** – उचितपदैः संभाषणांशान् पूरयतु।

गायत्री – पितामह ! वृक्षाणां सेकविधिः कीदृशी ?

पितामहः – रोपिताः वृक्षाः ग्रीष्मे ............ हेमन्ते ............ शिशिरे ............ वर्षासु .......... सेक्तव्याः।

गायत्री – वृक्षाणां रोपणे कालनियमः अस्ति किम् ?

पितामहः – आम् , अस्ति । अजातशाखान् वृक्षान् .............जातशाखान् ........... तथा महाशाखायुक्तान् वर्षासु च रोपयेत्।

**प्रवर्तनम् ५** – उदाहरणानुसारं सन्धिच्छेदं कुरुत–

उदा – कुर्वंस्तान् = कुर्वन् + तान्

कांस्कान् = ..........+ ...........

उदा – प्रातश्च = प्रातः+ च

सुहृदश्च = ..........+ ..........

उदा – इत्यस्ति = इति + अस्ति

स्वस्त्यस्तु = ..........+ ..........

उदा – तयोर्मिथः = तयोः+ मिथः

वृक्षयोर्मध्ये = ..........+ ..........

**प्रवर्तनम् ६** – खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत –

वृक्षरोपणाय प्रथमतः सस्यक्षेत्रं सज्जीकरणीयम् ,तच्च क्षेत्रं मृदुमृत्तिकायुक्तं भवेत् । प्रथमं तत्र तिलानि वप्तव्यानि । यदा तानि पुष्यन्ति तदा उपमृद्य मृत्तिकया सह योजयेत्। एवं पुष्टीकृते क्षेत्रे बालवृक्षरोपणं कर्तव्यम्। शुचिः भूत्वा वृक्षस्य स्नानानुलेपनैः पूजां कृत्वा रोपयेत्। अनेन प्रकारेण रोपितः बालवृक्षः तैरेव पत्रैः सह वर्धते न शुष्यति । अशोकः ,अरिष्टः, शिरीषः ,पुन्नागः ,प्रियङ्गुः इत्यादयः मङ्गलप्रदावृक्षाः आरामेषु ,गृहं परितः वा रोपणयोग्याः भवन्ति। रोपिताः वृक्षाः ग्रीष्मे सायं प्रातशच, हेमन्ते शिशिरे च दिनान्तरे, वर्षासु अपि आलवाले शुष्के सेक्तव्याः।

१ मृदः सम्पुष्टीकरणं कथं करणीयम् ?

२ आरामे रोपणीयाः वृक्षाः के ?

३ ग्रीष्मे वृक्षाः कदा सेक्तव्याः ?

४ आरामेषु रोपणीयाः मङ्गलप्रदाः वृक्षाः के ?

**प्रवर्तनम् ७** – सूचनाः पठित्वा लघूपन्यासं लिखत–

(सङ्घेषु सूचनाः वाचयन्तु। प्रत्येकस्याः सूचनायाः चर्चां कृत्वा आशयविपुलनं कुर्वन्तु। पुनः लघुटिप्पणिं लिखन्तु,कक्ष्यायाम् अवतारयन्तु । अध्यापिका स्खालित्यनिवारणे साहाय्यं करोतु।)

विद्यालयकार्षिकसमित्याः उद्घाटनं कुर्वन् कार्षिकाधिकारी प्रभाषणम् एकं कृतवान् । तस्य प्रभाषणस्य केचन अंशाः अधः प्रदत्ताः।

सूचनाः * प्रकृतेः परिस्थितेः च संरक्षकाः, * वृक्षाणां नाशनम्
* जन्मदिनोत्सवेषु वृक्षरोपणम् * सामूहिकवनवत्करणम्
* एको नरः एकः वृक्षः * छात्राणां युवकानां च कर्तव्यम्
* दशपुत्रसमो द्रुमः । ( द्रुमः =वृक्षः)

## एककम् ३ – मानवधर्मः

मानविकतायाः पोषणे,अस्माकं संस्कृतेः संरक्षणे च उपनिषदः, भगवद्गीता, महात्मनां जीवनचरितं च उपकुर्वन्ति। एकके अस्मिन् भगवद्गीतायाः केचन श्लोकाः प्रदत्ताः।

## पाठः ३ – गीतामृतम्

### पठनप्रवर्तनम् –१

अधो दत्तां खण्डिकां चार्ट्पत्रे विलिख्य प्रदर्शयतु।तदनन्तरं श्यामफलके लिखितानां प्रश्नानाम् उत्तरलेखनाय अध्यापकः निर्दिशतु।

अद्यतनकाले बह्व्यः समस्याः सन्ति। तासां परिहारः भगवद्गीतायाम् अस्तीति वक्तुं शक्यते।भारतीयसंस्कृतेः आदर्शभूतो ग्रन्थो भवति भगवद्गीता । महाभारतस्य भीष्मपर्वणः

स्वीकृतः अयं ग्रन्थः आमयानां भेषजमिव स्थितः भवति। अष्टादश अध्याययुक्तायाः भगवद्गीतायाः सप्तदशे श्रद्धात्रय नामके अध्याये आहारस्य यज्ञस्य च सात्विक–राजस–तामसभेदेन त्रैविध्यं, तथा  तपसः च शारीर –वाङ्मय–मानसरूपेण त्रैविध्यं च प्रतिपदितम्।

प्रश्नाः

१ भगवद्गीता कस्मिन् ग्रन्थे अन्तर्भवति ?

२ भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अन्तर्भवति ?

३ भगवद्गीतायाः कस्मिन् अध्याये श्रद्धात्रयम् उपवर्णितम् ?

४ नभगवद्गीतायां कति अध्यायाः सन्ति ?

५ तपसः त्रैविध्यं कथम् ?

(लिखितानि उत्तराणि परस्परं विनिमाय तेषां साधुतां परीक्षन्ताम् ।
अध्यापिका  चाट्र्पत्रे उत्तराणि क्रोडीकृत्य लिखेत्।)

मूल्यनिर्णयसूचकाः –

वाक्यशुद्धिः

समीचीनम् उत्तरम्

**पठनप्रवर्तनम् –२** – यथोचितं योजयत

छात्रान् सङ्घान् कृत्वा उत्तरलेखनाय निर्दिशति।

सात्विकाः – यज्ञम्,दानम्,तपः

राजसाः – प्रेतभूतगणान्

तामसाः – देवान्

त्रिविधाः – यक्षरक्षांसि

## पठनप्रवर्तनम् –३

अधोदत्तसूचनाः अनुसृत्य श्रद्धात्रयम् अधिकृत्य लघुटिप्पणीलेखनाय निर्दिशतु। सूचनाः चाट्र्पत्रे प्रदर्शयतु।

| |
|---|
| अदृष्टार्थेषु विश्वासः , त्रिविधा श्रद्धा ,आहारत्रयम् ,देवान् पूजयति, |

| |
|---|
| यक्षरक्षांसि पूजयति , प्रेतभूतान् पूजयति |

छात्रान् सङ्घं कृत्वा लेखनाय निर्दिशति। पुनः लिखतस्य कार्यस्य अवतरणार्थं निर्दिशति। परिष्करणम् अपेक्षितं चेत् अध्यापकः साहाय्यं यच्छेत्।

**पठनप्रवर्तनम् –४** उदाहरणानुसारं लिखत

उदा– चतस्रः विधाः यस्याः सा – चतुर्विधाः

तिस्रः विधाः यस्याः सा – ................

उदा– मृदः विकारः – मृण्मयः

................ – वाङ्मयः

उदा– न श्रद्धा – अश्रद्धा

न मेध्यम् – .........

उदा– सत्वस्य इयं – सात्विकी

.............. – तामसी

**पठनप्रवर्तनम् –५** – उदाहरणानुसारं लिखत

उदा– च + एव = चैव

अत्र + एवम् = .......

उदा– च+ इति =चेति

बालस्य + इति = ..........

उदा– ततः+ एव = तत एव

सः + एव = .........

कुतः + एव = .........

उदा– अन्यान् + च = अन्यांश्च

भूतगणान् + च = ..............

**पठनप्रवर्तनम् –६** – पट्टिकाकरणम्

भोज्यवस्तूनाम् नामानि रसमनुसृत्य पट्टिकां कुरुत –

छात्रान् षड्रसानां नाम्नि षड् सङ्घान् कृत्वा ,एकैकं सङ्घं तत्तद् रसयुक्तानां भोज्य– वस्तूनां चयनाय निर्दिशतु । भोज्यवस्तूनां नामानि चार्ट् पत्रे लिखित्वा प्रदर्शयतु।

| |
|---|
| कदलीफलम् –मरीचिका – क्षीरम् –सेवम् –घृतम् –शुण्डी– लवणितम् –कारवेलम् पक्वपनसम् –लड्डुकम् –निम्बः –मधुकर्कटी –मधु – हिङ्गुः– तिन्त्रिणी – तक्रम् पिप्पली – हरिद्रा –वचा –इक्षुः – बीजपूरकम् |

**पठनप्रवर्तनम् –७** – गद्यक्रमलेखनम्

अधोनिर्दिष्टानां श्लोकानां गद्यक्रमं लिखत –

छात्रान् सङ्घद्वयं कृत्वा श्लोके विद्यमानानां गद्यक्रमम् अवगन्तुम् योग्यानां आकाङ्क्षाप्रश्नानां चयनाय निर्दिशतु । प्रश्नोत्तरकेलीरूपेण परस्परं पृच्छन्तु उत्तरम् अवगच्छन्तु।

१ आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः।।

२ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः।।

**पठनप्रवर्तनम् –८** –आशयानुसारं श्लोकचयनम्

१ देवद्विजादीनां पूजनमेव शारीरं तपः इति प्रतिपादितः श्लोकः कः?

अनुद्वगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः उप उच्यते।
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।

२ सत्त्वरजस्तमोगुणोपेता श्रद्धा इति सूचितः श्लोकः कः?

सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यच्छ्रद्धः स एव सः।।
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्विकी राजसी चैव तामसी चेति तां शृणु।।

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

**पठनप्रवर्तनम् –९** – श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

यजन्ते सात्विकाः देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः।।

१ सात्विकाः किं कुर्वन्ति ?

२ के यक्षरक्षांसि भजन्ते ?

३ तामसाः जनाः किं कुर्वन्ति ?

४ कुपितांश्च = कुपितान् +च । एवं चेत् , भूतगणांश्च =.......+ ......

५ रजोगुणयुक्ताः = राजसाः । एवं चेत् , तमोगुणयुक्ताः = ............

मूल्यनिर्णयसूचकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

**पठनप्रवर्तनम् –१०** – समानार्थकपदचयनम्

कोष्ठकात् समानार्थकपदं चित्वा लिखत–

१ संयमः २ तूष्णीम् ३ कायः ४ ब्राह्मणः ५ आमयः

( मौनम् , विनिग्रहः, रोगः , शरीरम् , द्विजः , तैलम् )

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

पदशुद्धिः।

**पठनप्रवर्तनम् –११** – प्रश्नानाम् उत्तराणि लिखत

१ तपसः त्रैविध्यं कथम् ?

२ त्रयो गुणाः के ?

३ श्रद्धायाः त्रैविध्यम् कथम् ?

४ सात्विकानाम् आहाराः कीदृशाः?

५ राजसानाम् आहाराः कीदृशाः?

६ तामसानाम् आहाराः कीदृशाः?

७ शारीरं तपः किं भवति ?

८ मानसं तपः किं भवति ?

९ वाङ्मयं तपः किं भवति ?

## एककम् ४ – भारतीयचिकित्सापद्धतिः।

### आमुखम्

भारतीयचिकित्सापद्धतिषु आयुर्वेदस्य सुप्रधानं स्थानमस्ति। प्रकृतिविभवानुपयुज्य निर्मितानाम् औषधानां महात्म्यं न केवलं भारतीयाः किन्तु विदेशीयाः अपि जानन्ति।

## पाठः ४ – आयुर्दानं महादानम्

**प्रवर्तनम्– १** –खण्डिकां पठित्वा प्रश्नानामुत्तरलेखनम्

छात्राः खण्डिकां पठित्वा यावच्छक्यं प्रश्नान् निर्मान्तु । ततः सङ्घद्वयं करोतु । प्रश्नोत्तरक्रीडां चालयतु। एकस्मात् सङ्घात् एकः प्रश्नं पृच्छतु ।अन्यस्मात् सङ्घात् एकः उत्तरं वदतु। एतदनुवर्तताम् । सर्वेषामवसरः देयः।एकैकं प्रश्नान् उत्तराणि च स्वपुस्तके लेखनाय निर्दिशतु।

लोके आयुर्वेद –अलोप्पति –होमियो –सिद्ध– युनान्यादयः चिकित्सा सम्प्रदायास्सन्ति। भारतीयमहर्षीणां स्वास्थ्यविषयकविचारस्य परिणतिरेव आयुर्वेदः।आयुषः वेदः आयुर्वेदः। अस्मिन् शास्त्रे चरकसंहिता,सुश्रुतसंहिता अष्टाङ्गहृदयञ्चेति प्रसिद्धाः अनेके ग्रन्थास्सन्ति। श्री वाग्भटेन विरचितः ग्रन्थः भवति अष्टाङ्गहृदयम् । तत्रोक्तं च रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता इति।

कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान्
अष्टाङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता।

इत्यनेन श्लोकेन आयुर्वेदस्य अष्टाङ्गानि कानि इति स्पष्टं ज्ञातुं शक्यते।

अष्टाङ्गेष्वन्यतमस्य कायचिकित्साविभागस्य प्रामाणिकः ग्रन्थः भवति चरकसंहिता ।

स्वस्थे शरीरे स्वस्थं मन इति महतां वचनमारोग्यसंरक्षणस्य प्राधान्यं प्रकाशयति।

प्रश्ना– १

१ आयुर्वेदे प्रसिद्धाः ग्रन्थाः के?

२ अष्टाङ्गहृदस्य कर्ता कः ?

३ अरोगतायाः लक्षणं किम्?

४ आयुर्वेदस्याष्टाङ्गानि कानि?

५ चरकसंहिता कस्य विभागस्य प्रामाणिकः ग्रन्थः भवति?

मूल्यनिर्णयसूचिकाः–

आशयग्रहणशेषिः।

प्रश्ननिर्माणचातुरी।

भागभाक्त्वम्।

औचित्यम्।

## प्रवर्तनम् २

## सूचनानुसारम् उपन्यासलेखनम्।

प्रथमं छात्रान् सङ्घं कृत्वा आयुर्वेदस्याष्टाङ्गान्यधिकृत्य सूचनाः ददातु । छात्रान् सूचनानुसारं चर्चायै प्रेरयतु। चर्चां क्रोडीकृत्य प्रतिसङ्घमेकः उपन्यासं लिखतु। लिखितस्योपन्यासस्यावतरणाय निर्दिशतु। सर्वेषां सङ्घानामवतरणायावकाशः दातव्यः। लेखने जातदोषान् परिहृत्य स्वपुस्तिकायां लेखनाय निर्दिशतु।

प्रश्नः– अधोदत्तसूचनाः अनुसृत्य आयुर्वेदस्याष्टाङ्गान्यधिकृत्य लघूपन्यासं रचयत।

सूचनाः– सर्वाङ्गसम्बन्धीनि–मातृशिशुसंरक्षणम्–भूतविद्या–नेत्रश्रोत्रादीनां

चिकित्सा–अगदतन्त्रम्–रसायनविधिः–वृषचिकित्सा।

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

आशयक्रोडीकरणम्।

आशयावतरणम् ।

भाषाशुद्धिः।

## अनुबन्धप्रवर्तनम्

आयुर्वेदे स्वास्थ्यसंरक्षणमिति विषयमधिकृत्य सूचनाः उपयुज्य खण्डिकामेकां लिखत।

| |
|---|
| सूचनाः– हिताहारः–विषयेष्वसक्तः–आप्तोपसेवी–दानशीलः–सत्यपरः–क्षमायुक्तः। |

## प्रवर्तनम् ३

उदाहरणानुसारं समस्तपदलेखनम्।

उदा– आयुषः वेदः –आयुर्वेदः चेत् , धनुषः वेदः– ..........................

गृहे तिष्ठति इति गृहस्थः। स्वस्मिन् तिष्ठति इति –....................

वृक्षस्य संरक्षणं –वृक्षसंरक्षणम्। केशस्य संरक्षणम्–.....................

अन्यत् देशः देशान्तरम्। अन्यत् नाम .................................

चिकित्सायाः विधिः– चिकित्साविधिः। शिक्षायाः विधिः–.............

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

**प्रवर्तनम् ४** –प्रदत्तोदाहरणानुसारं सन्धिकार्यं लेखनम्।

उदा– आयुः + तस्य – आयुस्तस्य ततः + तथा

रामः+ तथा

उदा– तत् + च – तच्च अकरोत् + च

तत्र + उक्तम् – तत्रोक्तम्                    च + उपायम्

अष्टौ + अङ्गानि – अष्टावङ्गानि          एतौ + आगच्छतः

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

**प्रवर्तनम् –५** – यथोचितयोजनम्।

प्रश्नः ५ यथोचितं योजयत।

| | |
|---|---|
| बालचिकित्सा | अगदतन्त्रम् |
| शल्यचिकित्सा | वाजीकरणतन्त्रम् |
| ग्रहचिकित्सा | शस्त्रक्रिया |
| दंष्ट्राचिकित्सा | कौमारभृत्यम् |
| जराचिकित्सा | भूतविद्या |
| | रसायनविद्या |

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

पदशुद्धिः।

**प्रवर्तनम् ६** – सम्भाषणपूरणम्

प्रश्नः –निर्दिष्टसम्भाषणं पठित्वा रिक्तस्थानानि पूरयत।

रमा – नमस्ते ।

आचार्यः – .................आगच्छतु ,उपविशतु।

रमा – अहम् आयुर्वेदविषयमधिकृत्य संशयनिवारणार्थम् आगतवती।

आचार्यः – समीचीनम्। ..................।

रमा – आयुर्वेदे प्रसिद्धाः ................. के?

आचार्यः – अष्टाङ्गहृदयः, चरकसंहिता, सुश्रुतसंहिता इत्यादयः।

रमा – ................. केन विरचितः?

आचार्यः – अष्टाङ्गहृदयः वाग्भटेन विरचितः।

मूल्यनिर्णयसूचिकाः–

आशयावगमनम् ।

सयुक्तिकलेखनम्।

पदशुद्धिः।

## एककम् ५ – संस्कृतिः

### आमुखम्

भारतीयसंस्कृतिः लोके सर्वत्र अतीव प्राधान्यमावहति। तस्याः प्रचारणे साहित्यग्रन्थाः उपकुर्वन्ति। भारतीयसंस्कृतेः घटकेषु कलासाहित्ययोःसमञ्जस समाहाररूपमिदम् एककम् ।

## पाठः - ५ सुयोधनस्य राजनीतिः

संस्कृते अत्यन्तं प्रसिद्धानि पञ्च महाकाव्यानि भवन्ति रघुवंशम् , कुमार- सम्भवम् , शिशुपालवधम् (माघम्), किरातार्जुनीयम्, नैषधीयचरितम् चेति । भारविणा विरचिता भवति किरातार्जुनीयम्। "भारवेरर्थगौरवम् “ इति प्रथा प्रसिद्धा भवति । किरातार्जुनीयस्य केचन श्लोकाः अत्र समाकलिताः। पाण्ड- वानां वनवासकाले सुयोधनस्य शासनप्रकारः कीदृशः आसीदिति एतेषु श्लोकेषु प्रतिपादितः वर्तते। युधिष्ठिरेण नियुक्तः वनेचरः हस्तिनपुरं गत्वा दुर्योधनस्य शासनमधिकृत्य ज्ञात्वा तानि कार्याणि युधिष्ठिरं निवेदयति एतैः श्लोकैः।

**पठनप्रवर्तनम् १-** उपरि दत्तां खण्डिकां चार्ट् पत्रे विलिख्य प्रदर्शयतु। तदनन्तरं श्यामफलके लिखितानां प्रश्नानाम् उत्तरलेखनाय निर्दिशतु।

१ पञ्चमहाकाव्यानि कानि ?

२ किरातार्जुनीयस्य कर्ता कः ?

३ भारविम् अधिकृत्य विद्यमाना प्रसिद्धा उक्तिः का ?

४ वनेचरः इत्यस्य कः अर्थः ?

५ शिशुपालवधस्य अपरं नाम किम् ?

६ कः दुर्योधनस्य शासनप्रकारान् युधिष्ठिरं निवेदयति ?

मूल्यनिर्णयसूचकाः -

- आशयावगमनम्
- भाषाशुद्धिः

**पठनप्रवर्तनम् -२**

अधो दत्तयोः श्लोकयोः दुर्योधनः अहङ्कारं विना भृत्यबान्धवादिषु आदरं प्रकटयति इत्याशयप्रतिपादकः श्लोकः कः इति विवेचयतु ।

१ सखीनिव प्रीतियुजोनुजीविनः
समानमानान् सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम्।।

असक्तमाराधयतो यथायथम्
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम्।।

२ दुर्योधनः युधिष्ठिरात् पराजयं शङ्कते इति आशयः कस्मिन् श्लोके प्रतिपादितः इति विवेचयतु ।

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

विधाय रक्षान् परितः परेतरान्

अशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः।।

३ दुर्योधनः अधर्मनिवारणार्थं शत्रु - पुत्रभेदचिन्तां विना अधर्मिणां दण्डनं करोति इत्याशयप्रतिपादकः श्लोकः कः इति विवेचयतु।

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम्।।

सुखेन लभ्या दधतः कृषीवलैः
अकृष्टपच्या इव सस्यसम्पदः
वितन्वति क्षेममदेवमातृकाः
चिराय तस्मिन् कुरवश्चकासति।।

४ सज्जनैः सह शत्रुता अपि दुर्जनसंसर्गात् श्रेष्ठतरं भवति इत्याशयप्रति- पादकः श्लोकः कः इति विवेचयत ।

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसङ्गमा-
द्वरं विरोधोऽपि समं महात्मभिः।।

मूल्यनिर्णयसूचकाः -

आशयावगमनम्

सम्यक् शेलोकलेखनम्

**पठनप्रवर्तनम् -३-** यथोचितं योजयत

| | | |
|---|---|---|
| कालिदासः | - | किरातार्जुनीयम् |
| भारविः | - | रघुवंशम् |
| दुरोदरः | - | जिगीषा |
| जेतुम् इच्छा | - | द्यूतम् |
| | - | शिशुपालवधम् |

| | | |
|---|---|---|
| छन्दः | – | जिह्मः |
| वक्रबुद्धिः | – | वंशस्थम् |
| षड्वर्गः | – | धर्मः |
| त्रिवर्गः | – | कोपः |

मूल्यनिर्णयसूचकाः -

- उचितम् योजनम्

**पठनप्रवर्तनम् -४-** उदाहरणानुसारं लिखत

जिगीषा - जेतुम् इच्छा

प्रपित्सा - ……………………

**पठनप्रवर्तनम् -५-** उदाहरणानुसारं लिखत

उदा- ज्यया सह वर्तते इति - सज्यम्

१. चित्रेण सह वर्तते इति - …………

२. तालेन सह वर्तते इति - …………

उदा- गतामयः - गतः आमयः यस्य सः

गतस्मयः - ……………

गतद्वेषः - ……………

चतुर्वर्गः - चतुर्वर्गः

त्रयाणां गणः - ……………..

सुखस्य भावः - सौख्यम्

सख्युः भावः - …………

**पठनप्रवर्तनम् -६** - श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम्।।

१ सुयोधनः कथं धर्मविप्लवं निहन्ति ?

२ दण्डने कयोर्मध्ये भेदं न पश्यति ?

३ सुयोधनः केन मार्गेण दण्डनं विधीयते ?

४ पुत्रेऽपि = पुत्रे +अपि , तर्हि सुतेऽपि इत्यस्य पदच्छेदः कथम् ?

५ मित्रेण पालितः - मित्रपालितः , तर्हि गुरुणा उपदिष्टः इत्यस्य एकं पदं किम् ?

**पठनप्रवर्तनम् -७ - वाक्यप्रयोगाः**

**१** नराधिपैः अस्य शासनं शिरोभिः उह्यते । अयं कः प्रयोगः ?

( कर्तरि प्रयोगः , कर्मणि प्रयोगः, भावे प्रयोगः)

२ सः नयेन पौरुषं वितनोति। अयं कः प्रयोगः ?

( कर्तरि प्रयोगः , कर्मणि प्रयोगः, भावे प्रयोगः)

**पठनप्रवर्तनम् -८ - लघूपन्यासः**

अधोदत्तसूचनामनुसृत्य दुर्योधनस्य शासनप्रकारं लघूपन्यासरूपेण लिखत-
(निर्देशाः - छात्रान् सङ्घं कृत्वा सूचनानुसारं चर्चायै प्रेरयतु। प्रतिसङ्घं चर्चायाम् लिखितानि वाक्यानि क्रोडीकृत्य कक्षायाम् अवतारयतु। अननतरम् अध्यापकः उचितरीत्या शोधयतु)

सूचनाः - नयेन शासनम् - औदार्यादि गुणाः - सत्कीर्तिः - कामक्रोधादिरहितः - अहोरात्रम् अक्षीणपरिश्रमः - मित्रादीन् प्रति आदरः - अधर्मनाशनम् -

मूल्यनिर्णयसूचकाः

सर्वेषां सूचकानां स्वीकरणम्

आशयक्रमीकरणम्

उपन्यासस्वरूपः

## एककम् ५ –संस्कृतिः

## पाठः -६ – यागाश्वबन्धनम्

### आमुखम्

लोके सर्वत्र काव्यनाटकादीनि संस्कृतीनां पोषकाणि दृश्यन्ते। भास - कालिदासादिषु नाटककारेषु अन्यतमः भवति भवभूतिः। तेन विरचितं महत्तरं नाटकमस्ति उत्तररामचरितम् । नाटकस्यास्यास्य वैशिष्ट्येन भवभूतिः कालिदासानन्तरं कवीनाम् अग्रे गणनाम् अर्हति।

**पठनप्रवर्तनम् १** - खण्डिकां पठित्वा प्रश्नानाम् उत्तरं लिखत-

रामायणस्य उत्तरकाण्डात् इतिवृत्तं स्वीकृत्य सप्तभिः अङ्कैः विरचितम् उत्तररामचरितं नाटकं करुणरसप्रधानम् भवति। " उत्तरे रामचरिते भवभूतिः विशिष्यते" इति प्रथाप्यस्ति । अस्य नाटकस्य चतुर्थाङ्कात् स्वीकृतः कश्चन अंशः एव यागाश्वबन्धनमिति पाठः। जगत्प्रभुत्वमिच्छन्तः महाराजाः अश्वमेधयागं कुर्वन्ति। अयोध्याधिपस्य श्रीरामस्य भटैः रक्षितः यागाश्वः वत्मीकेराश्रमसमीपं प्राप्नोति। लक्ष्मणपुत्रः चन्द्रकेतुः सेनां नयति । अदृष्टपूर्वः इति कारणेन अश्वं दृष्टवन्तः वटवः विस्मिताः। ते लवस्य समीपं गच्छन्ति। तदा प्राचेतसं द्रष्टुं कौसल्या , जनकः , अरुन्धती च तत्र प्राप्नुवन्ति।

१ यागाश्वस्य रक्षायै नियुक्तस्य सैन्यस्य नायकः कः ?

२ जनकादयः कं द्रष्टुम् आश्रमं प्राप्तवन्तः?

३ भवभूतिमधिकृत्य का उक्तिः प्रसिद्धा ?

४ उत्तररामचरितनाटकस्य मुख्यरसः कः ?

५ नाटकस्य इतिवृत्तं कस्मात् ग्रन्थात् स्वीकृतम् ?

६ अश्वं दृष्ट्वा विस्मिताः वटवः कस्य समीपं गतवन्तः?

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

वाक्यशुद्धिः

**पठनप्रवर्तनम् - २** श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत

पश्चात्पुच्छं वहति विपुलं तच्च धुनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः।।

१ अस्मिन् श्लोके कः वर्ण्यते ?

२ अश्वस्य पुच्छः कीदृशः ?

३ अश्वः किम् अत्ति ?

४ अश्वस्य कति खुराः सन्ति ?

५ अश्वः अजस्रं किं करोति ?

मूल्यनिर्णयसूचकाः

आशयावगमनम्

समीचीनं उत्तरम्

**प्रवर्तनम् ३**- श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्रः
उद्गारिघोरघनघर्घरघोषमेतद् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र -
जृम्भाविडम्बिविकटोदरमस्तु चापम्।।

१ धनुषः कोटिः केन वलयितः ?

२ लवस्य धनुषः शब्दः कीदृशः ?

३ चापस्य उदरं कस्य वक्त्रमिव वर्तते ?

४ ज्या कथम् वर्णिता भवति ?

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

वाक्यशुद्धिः

**प्रवर्तनम् ४**- उदाहरणानुसारं एकपदं लिखत

नीलः कण्ठः यस्य सः - नीलकण्ठः

तर्हि, दीर्घा ग्रीवा यस्य सः - ………….

ज्ञातुम् योगयम् - ज्ञातव्यम्

गन्तुम् योगयम् - …………….

कर्तुम् योगयम् - …………….

मूल्यनिर्णयसूचकाः

समीचीनम् अपग्रथनम्

पदशुद्धिः

**प्रवर्तनम् ५** – उदाहरणानुसारं सन्धिं कुरुत

एभिः + नीतः = एभिर्नीतः

मुनिभिः + नीतः = ………..

मूल्यनिर्णयसूचकाः

सन्धिज्ञानम्

पदशुद्धिः

**प्रवर्तनम् ६**- श्लोकं पठित्वा अश्वस्वरूपं विवृणुत -

पश्चात्पुच्छं वहति विपुलं तच्च धुनोत्यजस्रं

दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।

शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्

किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः।।

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

वाक्यशुद्धिः

**प्रवर्तनम् ७**- अधोनिर्दिष्टसूचनाः पठित्वा लवस्य स्वभावं विलिखत

सूचनाः - सीतायाः पुत्रः - आश्रमे जीवति - आश्रमोचिताः विद्याः - आयुधविद्याः - धीरता - शास्त्रपाण्डित्यम् - लौकिककार्येषु अभिज्ञत्वम् - - अभिमानी- निर्भयः

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

वाक्यशुद्धिः

उपन्यासस्वरूपः

**प्रवर्तनम् ८** - भाषान्तरीकरणम्

दृश्य - श्रव्यभेदेन काव्यं द्विविधं भवति। दृश्यकाव्येषु दशरूपकं प्रधानं भवति। नाटकम् प्रकरणम्, भाणम् , प्रहसनम्, डिमम्, व्यायोगः, समवकारः, वीथी , अङ्कः, ईहामृगः चेति दशरूपकाणि सन्ति। शृङ्गारकरुणवीररसाः एव नाटके मुख्यरसत्वेन स्वीक्रियन्ते। नाटके नायकः धीरोदात्तः भवति।

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

वाक्यशुद्धिः

## पाठः ७ –केरलीयकलारूपाणि

प्रकृतेः अतिशयितानुकरणमेव कला । कला द्विविधा भवति। सुकुमारकला प्रयोजन–कला चेति। कलाः तत्तद्देशीयाचारानुष्ठानसम्बन्धिन्यः भवन्ति । प्रादेशिकजनजीवितस्य

तत्संस्कारस्य च उत्तममातृकाः एव एतानि कलारूपाणि । मानवसमाजस्य जीवन–व्यवहारात् आविर्भूताः इमाः कलाः। चाक्यार्कूत् , पाठकम्,हरिकथा,पूरक्कलि, कलरि–प्पयट्ट् आदयः कलाः केरलेषु प्रचुरप्रचारमाप्ताः । तादृशानि कानिचन केरलीयकलारूपाणि पाठभागे प्रतिपाद्यन्ते।

**प्रवर्तनम् १** –प्रदत्तं गद्यभागं पठित्वा अधः निर्दिष्टानां प्रश्नानाम् उत्तराणि लिखत

१ कलाः कतिविधाः भवन्ति? ताः काः?

२ प्रसिद्धानि केरलीयकलारूपाणि कानि ?

३ हरिकथायाः उपज्ञाता कः ?

४ केरलेषु प्रचुरप्रचारमाप्ता आयोधनकला का ?

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

वाक्यशुद्धिः

**प्रवर्तनम् २** – यथोचितं योजयत

चाक्यार्कूत्त् – सत्कथाकालक्षेपः

पाठकम् – आयोधनकला

कलरिप्पयट्ट् – भक्तिभावः

हरिकथा – वाक्यार्थविचारः

मूल्यनिर्णयसूचकाः

अपग्रथनम् निगमनम् च

पदशुद्धिः

प्रवर्तनम् ३ – उदाहरणानुसारं पदच्छेदं कुरुत

उदा – रीतिरत्र = रीतिः + अत्र

नीतिरत्र = ..........+ .......

तैरपि = ..........+ .......

पञ्चभिरत्र = ..........+ .......

सर्वैरपि = ..........+ .......

उदा प्रचारितोऽयम् = प्रचारितः+ अयम्

सोऽयम् = ..........+ .......

मूल्यनिर्णयसूचकाः

आशयावगमनम् ।

सयुक्तिकलेखनम्।

पदशुद्धिः

आशयावगमनम् ।

प्रवर्तनम् ४ – कलारूपयोः साजात्यानि मञ्जुषातः चित्वा लिखत

**चाक्यार्कूत्त् – पाठकम्**

| |
|---|
| पुराणकथा – भक्तिप्रधानम् – आहार्याभिनयः – धार्मिकविचारोत्पादिका – वाद्योपकरणानाम् उपयोगः – |

**चाक्यार्कूत्त् – हरिकथा**

| |
|---|
| पुराणकथा –वाद्योपकरणानाम् उपयोगः – श्लोकानाम् आलापः– धार्मिकविचारोत्पादिका – भक्तिप्रधानम् |

मूल्यनिर्णयसूचकाः

कलारूपस्य परिज्ञानम्

सयुक्तिकलेखनम्।

**प्रवर्तनम् ५** – गद्यांशं पठित्वा उत्तरलेखनम्–

प्रदत्तं गद्यभागं पठित्वा प्रश्ननिर्माणाय निर्दिशति। पुनः सङ्घाः भूत्वा प्रश्नोत्तरकेलिं प्रचालयति। प्रश्नान् लिखन्ति।

कूटियाट्टं प्राचीनदेवालयकला भवति। इयं संस्कृतनाटकाभिनयस्य प्रकारभेदः एव। अत्र सात्विकः ,वाचिकः , आङ्गिकः ,आहार्यश्चेति चतुर्विधाः अभिनयाः सन्ति। मिषाव् ,

तालं , इटक्का, शङ्खः  प्रभृतयः वाद्यविशेषाः अनुवाद्यरूपेण उपयुज्यन्ते । कूटियाट्टे स्त्रीपुरुषकथापात्रयोः समप्राधान्यमस्ति।चाक्यारः, नङ्ङ्यारः च मिलित्वा नटनं कुरुतः इत्यतः कूटियाट्टम् इति नाम। महाराजस्य कुलशोखरवर्मणः कालादारभ्यैव कूटिया–ट्टस्य प्रचारः प्रचुरः आसीत्। तदर्थं तोलः तस्य साहाय्यम् अकरोदिति ऐतिह्यमप्यस्ति।

१ कूटियाट्टे कतिविधाः अभिनयाः सन्ति?

२ कूटियाट्टे उपयुज्यमानाः वाद्यविशेषाः के?

३ कूटियाट्टमिति नाम कथं सञ्जातम् ?

४ कस्य शासनकाले कूटियाट्स्य प्रचारः प्रचुरः आसीत् ?

मूल्यनिर्णयसूचकाः

आशयावगमनम् ।

सयुक्तिकलेखनम्।

पदशुद्धिः

प्रवर्तनम् ६– सूचनाः पठित्वा कलरिप्पयट्ट् इति कलारूपमधिकृत्य उपन्यासलेखनम्

प्रथमं छात्रान् सङ्घं कृत्वा कलरिप्पयट्ट् अधिकृत्य सूचनाः ददातु । छात्रान् सूचनानुसारं चर्चायै प्रेरयतु। चर्चां क्रोडीकृत्य प्रतिसङ्घमेकः उपन्यासं लिखतु।लिखितस्य उपन्यासस्य अवतरणाय निर्दिशतु। सर्वेषां सङ्घानामवतरणायावकाशः दातव्यः। लेखने जातदोषान् परिहृत्य  स्वपुस्तिकायां लेखनाय निर्दिशतु।

सूचनाः –  ( आयोधनकला – आत्मरक्षार्थम् – कलरिनामकं परिशीलनस्थानम् – शास्त्रपठनम् – खलूरिका – शरीरिकमानसिकारोग्यवर्धनार्थम् )

अनुबन्धप्रवर्तनानि – एवं **पूरक्कलि ,हरिकथा, चाक्यार्कूत्त् ,पाठकम्** इत्येतेषामपि लघूपन्यासलेखनं विधेयम्।

मूल्यनिर्णयसूचकाः – आशयावगमनम् । भाषाशुद्धिः।आशयक्रोडीकरणम्।

## एककम् ५– संस्कृतिः

## पाठः –८ –सुरायाः असुरता

### प्रवर्तनम् –१ – खण्डिकां पठित्वा प्रश्नानाम् उत्तरलेखनम्

छात्रान् सङ्घद्वयं करोतु । प्रदत्तां खण्डिकां पठित्वा प्रश्ननिर्माणाय छात्रान् निर्दिशतु । पुनः प्रश्नोत्तरकेलिं प्रचालयतु। सङ्घेनापि रचिताः प्रश्नाः सर्वैरपि छात्रैः स्वस्वटिप्पणिपुस्तकेषु लेखनीयाः।

मातृका–

संस्कृतसाहित्ये कथासाहित्यस्य अत्यन्तं प्राधान्यस्ति। कथाः द्विविधाः ; उपदेशा–त्मिकाः, विज्ञानदायिकाश्चेति । बृहत्कथा,बृहत्कथामञ्जरी,वेतालपञ्चविंशतिः,इत्यादयः विनोददायिकाः, पञ्चतन्त्रं, हितोपदेशः इत्यादयः उपदेशात्मिकाः च भवन्ति । आर्यशूरेण विरचिता गद्यपद्यात्मिका जातकमाला इति बोधिसत्वस्यापदानकथा सुप्रसिद्धा भवति। जातकमित्यस्य जन्म इत्यर्थः। कपिलवस्तुनगर्यां राज्ञः शुद्धोदनस्य मायादेव्यां समुप्पन्नस्य पश्चात् गौतमबुद्ध इति विख्यातस्य बोधिसत्वस्य ५४६ पूर्वजन्मानि आसन्निति विश्व–सन्ति। श्रीबुद्धस्य पूर्वजन्मकथाः एव जातककथा इति विखाताः। जातकमालायां ३४ कथास्सन्ति। तासु कथासु कुम्भजातकं नाम मद्यवर्जनप्रेरिका कथा एव सुरापानमिति नाम्ना पाठ्यांशत्वेन समाकलिता।

प्रश्नाः

१ कथाः कतिविधाः सन्ति?

२ विनोददायकाः कथाग्रन्थाः के ?

३ उपदेशात्मकौ कथाग्रन्थौ कौ ?

४ जातकमालायां कति कथाः सन्ति ?

५ बोधिसत्वेन कति जन्मानि स्वीकृतानि ?

६ जातकमालायां कीदृश्यः कथास्सन्ति?

७ जातकमालायाः कर्ता कः?

८ जातकशव्दस्य कोऽर्थः?

९ सुरायाः असुरतेति कथा कस्मात्समाकलिता ?

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

प्रश्ननिर्माणचातुर्यम्

भषाशुद्धिः

**प्रवर्तनम् –२– वाक्यपूरणम्**

कोष्टके दत्तस्य पदस्य उचितरूपेण वाक्यं पूरयत–

उदा– .............. सर्वतः मक्षिकाः सन्ति। (ग्रामः)

ग्रामं सर्वतः मक्षिकाः सन्ति।

१ .......... सर्वतः मीनाः सन्ति।(नदी)

२ ........... सर्वतः भ्रमराः सन्ति।(उद्यानम्)

३ ............ सर्वतः छात्राः सन्ति।(विद्यालयः)

४ ............ सर्वतः पुष्पाणि सन्ति।(शाखा)

५ .......... अभितः वृक्षाः सन्ति।(मार्गः)

६ ............ अभितः भवनानि सन्ति।(नदी)

७ ........... उभयतः केदाराः शोभते। (मार्गः)

८ ............ परितः आपणानि सन्ति।(देवालयः)

| |
|---|
| अभितः, परितः, उभयतः, सर्वतः इत्याद्यव्ययानाम् योगे उपपदस्य द्वितीया विभक्तिः प्रयोक्तव्या। |

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

द्वितीयाविभक्तेः प्रयोगः

**प्रवर्तनम् –३ –यथोचितयोजनम्**

| अ | इ |
|---|---|
| सुरा | आज्यम् |
| कोटरम् | मृगवधाजीवः |
| व्याधः | मदिरा |
| घृतम् | निष्कुहः |
| | आलस्यम् |

मूल्यनिर्णयसूचकाः –

अर्थग्रहणम्

उचितं योजनम्

## प्रवर्तनम् –४– टिप्पणिलेखनम्

सूचकानां साहाय्येन सुरापानम् श्रेयांसि अपहरति इति विषयम् आधारीकृत्य टिप्पणिं लिखतु ।

सूचनाः –

सुरापानम् श्रेयांसि अपहरति – स्वच्छन्तं चरति –बुद्धिभ्रंशः –स्वकुलं विस्मरति –हसति –क्रुद्ध्यति–रुदति –कुमार्गे चरति –हीनकृत्येषु –संलग्नः –जनानां परिहारपात्रम्

मूल्यनिर्णयसूचकाः–

आशयग्रहणम्

सूचनानां स्वीकारः

भाषाशुद्धिः

आशयपूर्णता

## प्रवर्तनम् –५– स्ववाक्यैः उत्तरलेखनम्

छात्रान् द्वित्रान् सङ्घान् कृत्वा पञ्च वा षड् वा प्रश्नान् ददातु। छात्राः सङ्घशः उपविश्य पाठं वाचयित्वा प्रदत्तानाम् उत्तरं प्रत्यभिजानन्तु ।

प्रशाः –

१ सुरः कीदृशान् पक्षिमृगान् अपश्यत् ?

२ जन्तवः कथं पूर्वाधिकम् उन्मत्ताः अभवन् ?

३ मद्यस्य सुरा इति नाम कथं सञ्जातम् ?

मूल्यनिर्णयसूचकाः–

आशयग्रहणम्

भाषाशुद्धिः

आशयपूर्णता

**प्रवर्तनम् –६– सन्धिकार्यम्**

उदाहरणानुसारं सन्धिंकुरुत

उदा– तत् +जलम् =तज्जलम्

१ तत् +जनः = ............

२ तत् + च =...............

उदा कविः +इव = कविरिव

३ हरिः + इव =..............

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

उचितसन्धिप्रयोगः

**प्रवर्तनम् – ७ एकपदलेखनम्**

उदाहरणानुसारं एकपदं लिखत

उदा – बहुमानेन सह वर्तते इति – सबहुमानम्

१ आमोदेन सह वर्तते – ....................

२ गर्वेण सह वर्तते ..........................

३ स्नेहेन सह वर्तते ........................

उदा – भोक्तुं योग्यम् – भोग्यम्

४ भुक्तुं योग्यम् –...............

उदा – पातुं योग्यम् – पेयम्

गातुं योग्यम् – ..............

ज्ञातुं योग्यम् – .............

मातुं योग्यम् – .............

दातुं योग्यम् – .............

ध्यातुम् योग्यम् – .............

कर्तुं योग्यम् – .............

श्रोतुम् योग्यः – ..............

प्राप्तुं योग्या – ..............

उदा पठितुं योग्यम् – पठनीयम्

कर्तुं योग्यम् – .............

स्मर्तुम् योग्यम् – .............

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

उचितपदप्रयोगः

## एककम् –६– वास्तुविद्या

## पाठः – ९ –दिशानिर्णयः

**प्रवर्तनम् १–** खण्डिकां पठित्वा प्रश्ननिर्माणम् ,उत्तरलेखनम्।

आधुनिकयुगे भारतीयविज्ञानपरम्परायाः प्रशस्तिःप्रसक्तिश्च वर्धमाना दृश्यते। मुनुष्यालय–देवालय–वापीकूपतटाकादीनां निर्माणे वास्तुशास्त्रम् अनुपेक्षणीयं भवति भारतीयानाम्। शारीरिकमानसिकबौद्धिकमण्डलेष्वपि

वास्तुशास्त्रस्य प्रभावोऽस्ति वदन्ति पम्डिताः। शास्त्रविधीननुसृत्य निर्मितेषु गृहेषु निवसन्तः ऐश्वर्यसम्पन्नाः भवेयुरिति शास्त्रमेतदनुशास्ति। वास्तुविद्यायाः आधारः अथर्ववेदस्य उपवेदः स्थापत्यवेद इति गण्यते । केरलेषु वास्तुविद्या तच्चुशास्त्र–मिति नाम्ना अपि व्यवह्रियते। केरलीयेषु वास्तुशास्त्रग्रन्थेषु प्रथमगणनीयः ग्रन्थः भवति मनुष्यालयचन्द्रिका।श्रीमङ्गलं नीलकण्ठन् मूसत् एवास्य रचयिता । स्थान निर्णयात्पूर्वं दिशानिर्णयः करणीयः इति वास्तुशास्त्रमनुशास्ति।

१ गृहादीनीं निर्माणे भारतीयानां किमनुपेक्षणीयं भवति ?

२ केषु केषु मणडलेषु वास्तुशास्त्रस्य प्रभावोऽस्ति ?

३ कीदृशाः जनाः ऐश्वर्यसम्पन्नाः भवेयुः ?

४ वास्तुविद्यायाः आधारः कः ?

५ वास्तुशास्त्रं किम् अनुशास्ति ?

६ स्थापत्यवेदस्य प्राधान्यम् किम् ?

७ मनुष्यालयचन्दिकायाः कर्ता कः?

८ स्थापत्यवेदः कस्य वेदस्य उपवेदत्वेन परिगण्यते ?

९ केरलेषु वास्तुविद्या केन नाम्ना व्यवह्रियते ?

१० केरलीयवास्तुशास्त्रस्ग्रन्थेषु प्रथमगणनीयः ग्रन्थः कः?

११ मनुष्यालयचन्द्रिका कस्मिन् ग्रन्थविभागे अन्तर्भवति ?

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

सर्वेषां सूचकानां स्वीकारः

टिप्पणिस्वरूपः ,वाक्यशुद्धिः

## प्रवर्तनम् २–लघूपन्यासलेखनम्

प्रथमं छात्राणां सङ्घनिर्माणं करणीयम् । अध्यापकः दिशानिर्णयप्रक्रियाम् अधिकृत्य सूचनाः ददाति। सूचनानुसारं छात्राः चर्चां कुर्वन्तु। पुनः दत्तविषयम–धिकृत्य वैयक्तिकरूपेण लघूपन्यासं लिखन्तु,कक्षायाम् अवतारयन्तु।

| |
|---|
| भूमेः समीकरणं – शङ्कुस्थापनम् – छायायाः अङ्कनम् – वृत्तरचना –ब्रह्मसूत्ररचना – यमसूत्ररचना |

मूल्यनिर्णयसूचनाः

आशयग्रहणम्

सूचकानां स्वीकारः

भाषाशुद्धिः

लघूपन्यासस्वरूपः

## प्रवर्तनम् ३ – टिप्पणिलेखनम्

छात्राः प्रदत्ताः सूचनाः उपयुज्य टिप्पणिं लिखन्तु ।

| |
|---|
| सूचकाः – वृत्तरेखायां प्राह्णान्ते अङ्कनम्–अपराह्णे अङ्कनम्– त्रिधा विभजनम् पूर्वपश्चिमरेखायां वृत्तरचना–मत्स्यचिह्नम् |

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

सूचकानां स्वीकारः

भाषाशुद्धिः

टिप्पणिस्वरूपः

## प्रवर्तनम् –४

प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत–

१ वास्तुविद्यायाः आधारः कः ?(आयुर्वेदः, धनुर्वेदः,स्थापत्यवेदः)

२ मनुष्यालयचन्द्रिकायाः प्रतिपाद्यविषयः कः?(योगविद्या,भूतविद्या,वास्तुविद्या)

३ समीकृतभूमौ शङ्कुः कुत्र स्थापनीयः ?(पार्श्वे, मध्ये,अन्ते)

४ पूर्वपश्चिमरेखा केन नाम्ना व्यवह्रियते ?(देवसूत्रम्,ब्रह्मसूत्रम् ,यमसूत्रम्)

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

पदशुद्धिः

## प्रवर्तनम् ५– यथोचितं योजनम्

| मातृका –१ | मातृका –२ |
|---|---|
| आदिममनुष्यः –मत्स्यचिह्नम् | मनुष्यालयचन्द्रिका– वराहमिहिरः |
| अथर्ववेदः –सारदारुः | मयमतम् –भास्कराचार्यः |
| शङ्कुः –स्थापत्यवेदः | विश्वकर्मप्रकाशः –मयः |
| तच्चुशास्त्रम् –गुहावासी | बृहत्संहिता – विश्वकर्म |
| – वास्तुविद्या | तिरुमङ्गलत्तु नीलण्ठन् मूसत् |

## एककम् ७ – मानवधर्मः

**आमुखम् –** विश्वमानविकतायाः जाज्वल्यमानाः दीपशिखाः भवन्ति उपनिषदः। भारतीय संस्कृतेः अमूल्यानि योगदानानि उपनिषद्भ्यः एव प्राप्यन्ते।

## पाठः–१० –योगिनः सर्वसेवकाः

## प्रवर्तनम् १– खण्डिकां पठित्वा प्र<स्नानाम् उत्तरलेखनम्

स्वामिनः तपोवनाचार्यस्य जीवनचरितम् ईश्वरदर्शनमिति (तपोवनचरितम्) ग्रन्थे विस्तृतया रीत्या प्रतिपादितमस्ति। अस्मिन् ग्रन्थे न केवलं लौकिकजीवनचरितं ,किन्तु आध्यात्मिकजीवनप्रेरणादायकार्याणि च उपलभ्यन्ते। तपोवनस्वामी पालक्काट् जिल्लायां मुटप्पल्लूर् ग्रामे जनिम् अलभत। बाल्ये तस्य नाम सुब्रह्मण्य इत्यासीत्। सर्वैः चिप्पुक्कुट्टि नाम्ना व्यवहृतोऽयं संन्यासस्वीकारानन्तरं तपोवनस्वामीति प्रसिद्धोऽभवत्।सः कलारसिकः स्निग्धचित्तः,व्याकरणशास्त्रपण्डितः चासीत्। विभाकराख्यम् खम्डकाव्यं,विष्णुयमकं,कैलासयात्रा ,हिमगिरिविहारः,बदरीस्तोत्रम् इत्यादि ग्रन्थाः अपि तेन लिखिताः उपलभ्यन्ते। चिन्मयामिषन् इति संस्थायाः स्थापकस्य चिन्मयानन्दस्वामिनःगुरुनाथः अपि गुरुनाथः अपि भवति तपोवनस्वामी।

१ तपोवनस्वामिनः जीवनचरितग्रन्थस्य नाम किम् ?

२ तपोवनस्वामी कुत्र लब्धजन्माभूत् ?

३ बाल्ये तपोवनस्वामि नः नाम किमासीत् ?

४ सर्वैः सः केन नाम्ना आहूतः ?

५ चिन्मया मिषन् इति संस्थायाः स्थापकः कः?

६ तपोवनस्वामिना विरचितं खण्डकाव्यं किम्?

७ तपोवनस्वामिनःशिष्येषु प्रमुखः कः ?

८ तपोवनस्वामिना विरचिताः ग्रन्थाः के ?

९ संन्यासस्वीकारानन्तरं सुब्रह्मण्यः केन नाम्ना प्रसिद्धः अभवत्?

### प्रवर्तनम् २ – एकपदलेखनम्

उदाहरणानुसारम् एकपदं लिखत –

उदा– शान्तस्य भावः – शान्तता

१ धृष्टस्य भावः –

उदा– स्वामिनः दर्शनम् – स्वामिदर्शनम्

२ आत्मनः शान्तिः – ................

**प्रवर्तनम् ३** – यथोचितं योजनम्

| | |
|---|---|
| अनर्घम् | – निस्सीमा |
| प्रसङ्गः | – अगाधजलाशयः |
| विभूषणम् | – अमूल्यम् |
| ह्रदः | – अलङ्कारः |
| आत्यन्तिकी | – देशसेवा |
| | – सन्दर्भः |

**प्रवर्तनम् ४ – जीवनचरितलेखनम्**

**सूचनाः विपुलीकृत्य जीवनचरितं लिखत–**

सूचनाः – बालगङ्गाधरतिलकः–प्रथा लोकमान्यः–पिता गङ्गाधरतिलकः– जन्म –१८५६ तमे क्रिस्त्वब्दे– जन्मदेशः –रत्नगिरिनामके जनपदे –महाराष्ट्रे –गणितशास्त्रे नियमविषये च विबिरुदधारी–सेवनरङ्गः –पूनानगरे– फर्गूसन् कलाशालायाः अध्यापकः – महाराष्ट्रा,केसरिनामकस्य पत्रद्वयस्य प्रसाधकः – साहित्यप्रवर्तनम्– गीतारहस्यस्य कर्ता।

**मूल्सनिर्णयसूचकाः –**

आशयग्रहणम् –सूचकानां स्वीकारः
टिप्पणेः स्वरूपः– भाषाशुद्धिः
आशयपूर्णता

**प्रवर्तनम् ५**

छात्राः सङ्घशः उपविशन्तु। पाठभागस्य समग्रपठनं कुर्वन्तु। यावच्छक्यम् एकपदेन उत्तरयितुं योग्यान् प्रश्नान् निर्मान्तु। प्रश्नलेखनाय केचन मातृका प्रश्नाः अधः दत्ताः।

१ अधो दत्तेषु तपोवनस्वामिनः जीवनचरितग्रन्थः कः ?

(आत्मोपदेशशतकम्, ईश्वरदर्शनम्, मोहमुद्गरः)

२ कः गणे नान्तर्भति ?

(कैलासयात्रा, विष्णुयमकम्, नारायणीयम्)

३ सुरनदी इति प्रशस्ता नदी का ?

(गङ्गा, यमुना,कावेरी)

## प्रवर्तनम् ६ –लघूपन्यासलेखनम्

महात्मनां समूहसेवामधिकृत्य सूचनाः ददातु। छात्राः प्रदत्तं विषयमधिकृत्य चर्चां कुर्वन्तु। योगिनः कथं समाजसेवां कुर्वन्ति इति स्ववाक्यैः स्वस्वटिप्पणिपुस्तकेषु लिखन्तु ।

सूचनाः – आध्यात्मिकानुभवनिष्ठा –आत्मविद्योपदेशः –आत्मशान्तिः – देशस्योपकृतिः – सुरनदीहृदः –दुःखाग्निसन्तप्तः संसारः–पुरुषार्थाः– आत्मशान्तिः–अमूल्यनिधिः– सर्वस्पृहणीयलोककल्याणकारी

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

सूचकानां स्वीकारः

लघूपन्यासस्वरूपः

भाषाशुद्धिः

आशयपूर्णता

## पाठः ११ – दीक्षान्तोपदेशः

## प्रवर्तनम् १ – गद्यांशं पठित्वा उत्तरलेखनम्–

प्रदत्तं गद्यभागं पठित्वा प्रश्ननिर्माणाय निर्दिशति। प्रश्नान् लिखन्ति। पुनः सङ्घाः भूत्वा प्रश्नोत्तरकेलिं प्रचालयन्ति।

सर्वचराचराणां योगक्षेमपराणि उपनिषत्तत्त्वानि प्रकृतेः सुस्थिरविकासाय च अत्यन्तम् उपकुर्वन्ति । सनातनधर्मस्य प्रामाणिकग्रन्थाः भवन्ति वेदाः । वेदस्य अन्तिमभागः एव उपनिषत् । सः वेदान्तः इत्युच्यते। तासु उपनिषत्सु दशोपनिषदां भाष्यं शङ्कराचार्येण विर–चितम् । दशोपनिषदः यथा

ईश–केन–कठ–प्रश्न– मुण्ड–माण्डूक्य– तित्तिरिः–
ऐतरेयं – च छान्दोग्यं –बृहदारण्यकम् दश ।

ऋक्–यजुः–साम– अथर्वेषु चतुर्षु वेदेषु यजुर्वेदस्य द्वौ भागौ स्तः,शुक्लयजुर्वेदः, कृष्णयजुर्वेदः च । कृष्णयजुर्वेदान्तर्गतायाः तैतरीयोपनिषदः शिक्षावल्लीनामकात् प्रथम भागात् उद्धृतः एकादशः अध्यायः अत्र प्रस्तूयते। समाप्तविद्यं शिष्यं प्रचोदयितुम् गुरूपदे–शात्मकः अयं भागः। स्वस्य व्यक्तित्वविकासः,परिवारबन्धः, समाजे तस्य कर्तव्यं चेति गृहस्थाश्रमिणाम् आवश्यकाः विषयाः उपदेशरूपेण अत्र प्रदीयन्ते। छात्रस्य समग्र विकासः एव प्राक्तनशिक्षालक्ष्यमिति अस्माभिः ज्ञातुं शक्यते।

प्रश्नाः

१ सनातनधर्मस्य प्रामाणिकग्रन्थाः के ?

२ वेदस्य अन्तिमभागः कः?

३ दशोपनिषदां भाष्यं केन विरचितम् ?

४ दीक्षान्तोपदेशः इति पाठभागः कस्मिन् उपनिषदि अन्तर्भवति ?

५ दीक्षान्तोपदेशः इति पाठस्य सारांशः कः?

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

वाक्यशुद्धिः

## प्रवर्तनम् २– यथोचितं योजयत

| | |
|---|---|
| अनूच्य | – आनीय दत्वा |
| आहृत्य | – उपदिशति |

अनुशास्ति – शिष्यः

अन्तेवासिनः – अध्याप्य

मूल्यनिर्णयसूचकाः

अपग्रथनम् निगमनम् च

पदशुद्धिः

**प्रवर्तनम् ३ – उदाहरणानुसारं पदच्छेदलेखनम्**

सत्यात् + न = सत्यान्न

धर्मात् + न = ...........

कुशलात् + न = ...........

मूल्यनिर्णयसूचकाः

अपग्रथनम् निगमनम् च

पदशुद्धिः

**प्रवर्तनम् ४ –** आशयं पठित्वा समानाशयप्रतिपादकम् उपनिषद्वाक्यं चित्वा लिखत

आशयः – सर्वदा सत्यं वदतु ,किन्तु अप्रियं सत्यं न वक्तव्यम् । प्रियकरं कार्यं वदतु, किन्तु असत्यं प्रियकरं कार्यं न वक्तव्यम्।

१ स्वाध्यायात् मा प्रमदः।

२ सत्यं वद ,धर्मं चर।

३ सत्यात् न प्रमदितव्यम् , धर्मान्न प्रमदितव्यम् ,कुशलान्न प्रमदितव्यम्।

सत्यं ब्रूयात् प्रियं ब्रूयात्
न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयात्
एष धर्मः सनातनः।।

सत्यमेवेश्वरो लोके
सत्ये धर्म प्रतिष्ठतम् ।

सत्यमूलानि सर्वाणि
सत्यान्नास्ति परं पदम्।।

**प्रवर्तनम् ५** – उपन्यासलेखनम्

प्रश्नः – अधोदत्तसूचनामनुसृत्य उपन्यासं लिखत

सूचनाः –

| |
|---|
| सत्यम् – धर्म –स्वाध्यायः – गुरुदक्षिणा – गृहस्थाश्रमः<br>ईश्वरप्रीतिजनकं कर्म – पितरौ– आचार्य – अतिथयः –<br>देवरूपेण दर्शनम् – दानम् – विवेकः – अक्रूरता |

मूल्यनिर्णयसूचकाः

आशयग्रहणम्

भाषाशुद्धिः

आशयस्पष्टता

लघूपन्यासस्वरूपः

# प्रश्नपत्रम्

STD X

Total Score –40

Time 90Minutes

सूचनाः – सर्वे प्रश्नाः समाधेयाः। उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या ।

१ यथोचितं योजयत – ४

| | | |
|---|---|---|
| तपोवनस्वामी | – | उत्तररामचरितम् |
| मयः | – | जातकमाला |
| आर्यशूरः | – | मयमतम् |
| भवभूतिः | – | विभाकरः |
| | – | बृहत्संहिता |

२ दुर्योधनः युधिष्ठिरात् पराजयं शङ्कते इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत – २

अ) विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरछद्मजितां समीहते ।
नयेन जेतुं जगतीं सुयोधनः।।

आ) विधाय रक्षान् परितः परेतरा–
नशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः।।

३ आयुर्वेदस्य अष्टाङ्गानि अधिकृत्य सूचनानुसारं लघूपन्यासं लिखत– ५

सूचनाः – आयुषः वेदः – अरोगता –चरकादयः – आचर्याः– अष्टाङ्गहृदयः–
अष्टाङ्गानि–नामान्तराणि –प्रामाणिकग्रन्थाः–

४ अधोदत्तानि भोज्यवस्तूनि रसांश्च पट्टिकारूपेण लिखत– ३

लड्डुकम् –कारवेलल्म् – तिन्त्रिणी –पूगः –मरीचम् –लवणितम् –

५ सस्यक्षेत्रसज्जीकरणम् अधिकृत्य टिप्पणिं लिखत– ३

सूचनाः – मृदुमृत्तिकायुक्तम् –तिलवपनम् –मृत्तिकया सह योजनम्

६ ब्रह्मसूत्ररचना कथमिति विशदयत। २

७ अतिथिः देवरूपेण पूजनीयः इत्याशयप्रतिपादकम् उपनिषद्वाक्यम् चित्वा लिखत १

(पितृदेवो भव, अतिथिदेवो भव, मातृदेवो भव)

८ पिता पुत्रं धर्मं ब्रूते इति वाक्ये धर्मम् इति प्रधानकर्म , पुत्रमिति अप्रधान कर्म । २

तर्हि , याचकः धनिकं धनं याचते इति वाक्ये प्रधानकर्म, अप्रधान कर्म च विवेचयत।

९ सूचनानुसारं पूरक्कलिम् अधिकृत्य टिप्पणिं लिखत– ३

सूचनाः – ग्रामीणकला– मिलित्वा नर्तनम्– स्पर्धारूपेण अवतारणम्–

शास्त्रार्थविचारः –ताण्डवप्रधानम्

१० उदाहरणानुसारं वाक्यम् पूरयत – १

उदा – ............ सर्वतः मक्षिकाः सन्ति ।(ग्रामः)

ग्रामं सर्वतः मक्षिकाः सन्ति । एवञ्चेत् ,

.......... सर्वतः छात्राः सन्ति।

११ सम्भाषणांशान् पूरयत ५

सुरेशः – नमस्ते । भवान् कुत्र.........।

रमेशः – ........... ग्रन्थालयं गच्छामि।

सुरेशः – कः विशेषः ?

रमेशः – मम एकः ग्रन्थः आवश्यकः ।

सुरेशः – ग्रन्थस्य ...............

रमेशः – तस्मिन् वृक्षरोपणविधयः प्रतिपादितः।

१२ खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत– ५

श्रीनारायणपण्डितेन विरचितः ग्रन्थः भवति हितोपदेशः। पाटलीपुत्रस्य राज्ञः सुदर्शनस्य पुत्राणां पाठनायैव ग्रन्थस्यास्य रचना कृता इति श्रूयते। पञ्चतन्त्रात् स्वीकृताः पञ्चविंशति कथाः स्वयं लिखिताः सप्तदशकथाश्च सम्मिल्य द्विचत्वारिंशत् कथा अस्मिन् ग्रन्थे अन्तर्भवति। ग्रन्थस्यास्य मित्रलाभः,सुहृद्भेदः ,विग्रहः, सन्धिः इति चत्वारः भागाः सन्ति। भारते सर्वत्रापि हितोपदेशस्य प्रचारः अस्ति। सर्वासु भारतीयभाषासु हितोपदेशस्य अनुवादाः सन्ति।

*हितोपदेशस्य कर्ता कः ?

*हितोपदेशस्य रचनायाः उद्देश्यं किम् ?

*आरुह्य इति ल्यबन्तम् अव्ययम्।समानम् अव्ययं खण्डिकातः चित्वा लिखत–

*हितोपदेशस्य चत्वारः भागाः के ?

१३ प्रादेशिकभाषायां परिवर्तयत – ५

श्री ए.आर् . राजराजवर्म प्रशस्तः केरलीयकविः पण्डितश्च भवति। मलयालभाषायां व्याकरण रचनया सः केरलपाणिनिः इति विख्यातः। तेन विरचितं महाकाव्यं भवति आङ्गलसाम्राज्यम्। आङ्गलशासनकालीन भारतचरित्रं च अस्मिन् ग्रन्थे समग्रतया प्रतिपादितम्। काव्यमिदं संस्कृतमहाकाव्यलक्षणमनुसृत्यैव लिखितं वर्तते।